Sahitya Manthan
A Peer-Reviewed, Open Access e-journal
ISSN: 2582 6867, Website: http://www.sahityamanthan.in
Year-2, Issue-9, Continuous Issue-15, September - October 2022

# वैदिकराष्ट्रगाने राष्ट्रभावना

अस्माभिः श्रूयते राष्ट्रियतागौरवगानं प्राङ्महर्षीणां वैदिकानाममलवाक्षु । विश्वस्मै विश्वाय धर्मार्थकाममोक्षरूपंराजमार्गं निबोधयितृषु ज्ञानविज्ञाप्रकाशेन धरणीमालोकयितृष्वात्मपरमात्मसत्यस्वरूपप्रतिपादयितृषु चतुर्षु वेदेषु यत्र-तत्र सर्वत्र राष्ट्रियतास्वरो भवति मुखरितः । तद्वत् लौकिककविकलापेऽप्यवलोक्यते राष्ट्रियतास्वरो भवन्मुखरितः । किन्तु लौकिककविवैदिककविमुख्ययोरस्ति नितरां भेदो राष्ट्रियगौरवगाननिरूपणे । लौकिककवीनां राष्ट्रविषयकं प्रेम आस्वराष्ट्रराज्यप्रजाकल्याणमस्ति सीमितम् । किन्तु वैदिकर्षीणां राष्ट्रगौरवप्रेम सकलां वसुधां प्राणिमात्रञ्च स्वाङ्के कुर्वदस्ति। 'यत्र विश्वं भवत्येकनीडम्' इति व्यापिका दृष्टिर्वेदेषु सर्वत्र परिलक्ष्यते । वेदेष्वनेकत्र स्वमातृभूरक्षायै संदिष्टमस्ति। वेदेष्वनेकत्र स्वमातृभुवो मुक्तकण्ठप्रसंशाऽक्रियत, तत्पठतां शृण्वतां वा देशवासिनां हृत्सु प्रतिस्वदेशं गौरवभाव उत्पद्यते । वैदिका ऋषयो न केवलं स्वमातृभुवो वनपर्वतसरित्सागरसौन्दर्ये परममुग्धा अपि तु अधिस्वमातृभूनिवसज्जनमपि मुग्धाः तद्रक्षायै राष्ट्रगौरवाभिवृद्धये च कृतभूरिपरिश्रमाश्च दृश्यन्ते । वैदिकर्षीणामियं परिशुद्धोद्दात्ता च राष्ट्रगौरववर्धनभावना चतुर्ष्वपि वेदेषु नानासूक्तमन्त्रेषु विलसन्ती दृश्यते । यथा यजुर्वेदस्य द्वाविंशाध्यायस्य द्वाविंशे वैदिकराष्ट्रगानात्मके मन्त्रे राष्ट्रस्य गौरवाभिवृद्ध्यर्थं परब्रह्म प्रार्थ्य राष्ट्रगौरवभावनयैवोक्तमृषिभिः राष्ट्रतत्त्वविमर्शिभिः –

आ ब्रह्यन् ब्राह्मणो बह्मवर्चसी जायताम्

आ राष्ट्रे राजन्यः शूर इषव्यः अति

व्याधी महारथो जायताम्

दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः

पुरंध्रिर्योषा जिष्णू रथेष्ठाः सभेयो

युवाअस्य यजमानस्य वीरो जायतां

निकामे निकामे नः पर्जन्यो वर्षतु

फलवत्यो न ओषधयः पच्यन्ताम्

योगक्षेमो नः कल्पताम् (यजुर्वेद **22/22**)[१]

हे ब्रह्मन् ! आ राष्ट्रे ब्राह्मणो बह्मवर्चसी आजायताम् -

अत्रोक्तमृषिभिर्यद्राष्ट्रगौरवं तदैव स्याद्यदा राष्ट्रे शिक्षकभूता यज्ञं कुर्वाणाः कारयन्तो दानं कुर्वाणा गृह्णन्तः स्वयं पठन्तोऽन्यान् राष्ट्रियान् राष्ट्रहितं पाठयन्तो ब्राह्माणा ब्रह्मवर्चस्विनो परिशुद्धसर्वब्रह्ममयविचाराप्लुता भवेयुः। वैदिकसंस्कृतिव्यवस्थायां वैचारिकोच्चताया अस्ति सर्वश्रेष्ठं स्थानम्। यदि स्याद्वैचारिकश्रेष्ठता स्यादाचरणमपि श्रेष्ठम्, जनमानसवैचारिकोन्नतिरपि स्यात्, सर्वाभ्युदयश्च संभवेत्। वेदानां तेजसा ज्ञानप्रकाशेन ब्रह्मचर्यौजसा संयमस्योर्जया च भावभरिता एव

ब्राह्मणा नित्यं सर्वब्रह्ममयरसास्वादिनो राष्ट्रगौरवाय स्वचिन्तनविचाराणामाहुतिं दातुमर्हन्ति । तेषामेवोद्दात्तविचारवतां ब्राह्मणानामुदात्तचिन्तनपरायणानां चिन्तनेन राष्ट्रजीवनं भवेदूर्जस्वि गुरुताभरभरितञ्च । अब्रह्मवर्चो ब्राह्मणत्वं नावतिष्ठते । न चावर्चोब्राह्मणं समष्टिचिन्तनं प्रचोदितं सगति च भवेत् ।

हे ब्रह्मन् ! आ राष्ट्रे राजन्यः शूर इषव्य - शस्त्रज्ञः अतिव्याधी- शत्रुवधकुशलः महारथश्च आजायताम् -

अत्र ब्रह्म प्रार्थयद्भिर्ऋषिभी राष्ट्रवृद्धावेव राष्ट्रगौरं मन्वानै राजन्यः राजवंशीयः पुरुष अधिराष्ट्रं शूरः शौर्ययुतो भवेदिति याचितम् । अधिराष्ट्ररक्षं राजवंशीयानामुचितो विनियोगस्तदैव स्याद्यदा राजन्याः शूरा वीराश्च भवेयुः । शौर्यं च तदैव सफलायते यदा राजन्या लक्ष्यवेधशौण्डाः स्युः । लक्ष्यवेधसाफल्यञ्च शूरराजन्ये आरनाशकारिणि सत्येव । वीरबालका न केवलं सैनिकत्वं प्राप्नुयुरपि तु महारथिनो महाबलिनोऽतिरथिनः सेनानायकाः भूयासुः । यतोहि तेष्वेव बलिषु राष्ट्रबलं स्यात् । बलवति च राष्ट्रे राष्ट्रस्य गुरुता अधिविश्वं प्रसरेत् । महारथिषु शत्रुनाशकारित्व-शूरवीरत्व-लक्ष्यवेधकारित्वादिगुणेषु सत्स्वेव राष्ट्रसङ्कटमपयाति । राष्ट्रसङ्कटे च नष्टे राष्ट्रगौरवं सुस्थायि भवेत् ।

हे ब्रह्मन् ! आ राष्ट्रे दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः च आजायाताम्- समस्ते राष्ट्रे धेनवो सुदुग्धाः स्युः, अनड्वांशः वोढारो भवन्तु सप्तयोऽश्वा आशुधावनशीला भूयासुः

देशरक्षाव्यवस्थां विना यज्ञप्रवर्तनमसम्भवमेव । निर्विघ्नयज्ञसम्पादनायर्षिपरम्परानिर्वाहाय च पुष्टप्रसन्नानां धेनूनामस्तित्वं नितरामावश्यकम् । तासां दुग्धाभावाद्देशे राष्ट्रे वा हव्याः कव्याः क्रियाः स्वाहास्वधाप्रवृत्तिश्च सर्वथासम्भावा एव । दोग्ध्री धेनुर्नाम धेनवस्तु स्वसेवकान् प्रासादयन्त्येव । न केवलं दुग्धं ददाति प्रसीदत्यपि, एषोऽस्ति धेनुमातृस्वभावः । पञ्चगव्यमेव देवर्षिपितृगणान् तर्पयति । वैचारिकतर्पणायाप्यस्ति महत्सामर्थ्यम् । भारतदेशगौरवभूतानां कृषिगोरक्षावाणिज्यानां वोढा नाम प्रापको धारको वावश्यकः, पोषणं पालनं धारणं चान्तरा राष्ट्रं सबलं समर्थं सगौरवं च न भवेत् । गोजा वृषभा यदा व्यावसायमाध्यमं भविष्यति तदैव तु राष्ट्रसमृद्धिः स्यात् समृद्ध्या च विश्वस्मिन् विश्वे गौरवान्वितं राष्ट्रम् । अस्मदीये राष्ट्रे वृषभो धर्मरूप एवेति मन्यन्ते जनाः । यदास्य राष्ट्रस्य व्यवसायिनो धर्ममेव वृषभं कृत्वा विनिमयाधारमकरिष्यंश्चेद्धहवालाघोटालातहलकाबोफोर्सादिभ्रष्टता राष्ट्रे नाघटिष्यन् । आवागमने यद्यप्रमादोऽभविष्यत्, यथेच्छमावागमनमभविष्यच्चेद्राष्ट्रियं जीवनं सगति अभविष्यत् । आशुः सप्तिरिति ऊचाना ऋषयः प्रतिद्रुतगत्यश्वं समकेतयन्त । गतिमत्त्वञ्च रक्षकाय राजन्याय पोषकाय व्यवसायिने चावश्यकं यतो हि राष्ट्रगौरवायोभयोरप्येतयोर्नितान्तमावश्यकतास्ति । रक्षकस्य शूरता पोषकस्य पोषकता च अश्वान् वाहनानि आवागमनानि वा श्रिते । एतत्सर्वमपि तदा भवति मुधा यदा राष्ट्रिका नार्यः स्वपाटवेन स्वराष्ट्रं न पोषयेयुः । अत एव ब्रह्म प्रार्थ्यते ऋषिभिः -

हे ब्रह्मन् ! आ राष्ट्रे पुरंध्रिर्योषा आजायताम् – नारी पुरं धारयित्री भूयादिति –

परिवारो राष्ट्रस्य लघुतमांशोऽस्ति । तस्य पालनपोषनरक्षणसंवर्द्धनानि नारीश्रितानि । अत एव ऋषिभिः पुरन्ध्रिर्योषेत्युक्तम् । यज्ञपरम्परानिर्वाहका यजमाना भवन्ति । ते तदैव सफला अभिविष्यन् यदा तेषामङ्गनानि वीरबालैरशोभयिष्यन् । अत एवोच्यत ऋषिभिः –

हे ब्रह्मन् ! आ राष्ट्रे जिष्णू रथेष्ठाः सभेयो युवा अस्य यजमानस्य वीरो जायताम् - अस्य यजमानस्य बालो राष्ट्रयुवा राष्ट्राय जिष्णुः, महारथी, सभ्यो वीरः च भवतु इति –

इमे बालकाः युवशक्तिमन्तो सभोपवेशनाः सभाचारव्यवहारज्ञाः सभाशीलाभ्यासावबोधकुशलाः भवेयुः। ये युवानो रथिनो सैनिका वा भवेयुस्ते जीष्णवः स्युः तदैव विजया भवेयुः ।

निकामे निकामे नः पर्जन्यो वर्षतु –

अत्रर्षिभिर्मानवीयजीवनेन अपेक्षाभिश्च समं राष्ट्रियाभ्युदयाय यज्ञसाफल्येनोत्पद्यमानेभ्यो मेघेभ्यो यथासमयमपेक्षिता वर्षाः प्रार्थिताः । यतोहि शस्यसम्पत्तिं विना राष्ट्रपोषणं न भवति । न चापुष्टं राष्ट्रं गौरवमाप्नोति ।

फलवत्यो न ओषधयः पच्यन्ताम् -

अत्र वैदिकर्षिभिर्जीवनेविघ्नकारिणो रोगान्त्रुटज्जीवनक्रममभिलक्ष्यैव ओषधीनां फलवत्तायै व्यापकाद्देवाद्याचितम् ।

योगक्षेमो नः कल्पताम् - अप्राप्तस्य प्रापणं भवतु प्राप्तस्य च रक्षणम् इति अस्मभ्यं कल्पतामिति –

अत्र वाक्ये उक्तं ऋषिभिर्यदेतदधस्तादुक्तं सर्वं अस्माकं भवतु किन्तु यदस्माभिरप्राप्यमस्ति तदपि अस्मान् प्रापयतु तद्रक्षणाय च सुबलं सुमतिं च कल्पताम् ।

यस्मिन्राष्ट्रे पारदर्शिज्ञानस्य ऊर्जा समृद्धा भवेत्, सीमसु प्रहरिणो सचेष्टा लक्ष्यनिष्ठाः च भवेयुः, समाजपालनपोषणकर्तारो धर्मशीला भवेयुः, गाहर्या नार्यः परिवारप्रतिष्ठाप्रतीकं स्युः, गावो देवर्षिपितृकार्यक्षमा वर्तेरन्, युवानो निर्भयं स्वशक्तिविनियोगं राष्ट्रहिताय राष्ट्रगौरवाय च कुर्युः, नावर्षाप्रभावो भवतु, कृषिः फलवती स्यात्, ओषधयः परिणामकारिण्यः स्युः, तद्राष्ट्रमेव समृद्धं समर्थं सगौरवं च स्यात् । यत्र गृहाणि, रक्षासंस्थानानि, व्यापारसंस्थाः चिकित्साविभागश्च सन्ततं क्रियान्विताः स्युः तत्र प्रत्येकं गृहाणि परिवारा वा प्रसन्ना उन्नता राष्ट्राङ्गानि च भवेयुः । वैदिकराष्ट्रगानमिदं राष्ट्रगौरवभावनाया वैदिकराष्ट्रगौरवभावनोदाहरणेष्वन्यतममुदाहारणम् । इयं राष्ट्रगानं राष्ट्रगौरवभावनावृद्धये अद्यापि तावदेव प्रासङ्गिकं यावत्प्रागासीत् ।

सन्दर्भः १. यजुर्वेद, डॉ. रेखा व्यास, संस्कृत साहित्य प्रकाशन,न्यू.दिल्ली , २०१५, isbn-८१-७९८७-०९६-०

---

डॉ. अत्रिकुमारः नवलशङ्करः राजगोरः

सहायकः प्राध्यापकः संस्कृतम्

श्री रा. र. लालन कॉलेज, भुज, कच्छ

दू. भा. ९४२८४७०३१५

Email – atrirajgor@gmail.com